7. ***Vyatihaara-lakshana-Bahuvreehi :*** formed with some means of work in both components.

द्विपदबहुव्रीहिसमासः
(DWIPADA-BAHUVREEHI SAMAASA)

श्लो ॥ प्राप्ताग्निमेवमिषुमूढरथानथाश्वां
स्तूणीरमुद्धतशरं च वहन् जवेन ।
रुद्रोपि वीरपुरुषास्स पुरो बिभेद
देवैश्च दत्तपशुरेव महाबलस्सन् ॥ 26

टीका - सन् - Being महाबलः - the God of the greatest strength सः - that रुद्रः - Siva एव - himself दत्तपशुः - to him a beast was given देवैः - by gods बिभेद - destroyed पुरः - the cities वीरपुरुषाः - having valiant men in them जवेन - with rapidity वहन् - carrying इषुम् - a bow प्राप्ताग्निम् - which fire possessed च - and अथ - later तूणीरम् -a quiver उद्धतशरम् - from which arrows were taken out अपि - and also वहन्- driving अश्वान् - the horses ऊढरथान् - which drew his chariot एवम् - like this.

SUMMARY : Being the God of the greatest strength, Lord Siva was prayed to by all other gods who made to him an offering of a beast. At their prayer, Siva himself held a bow possessed by Fire-god, drove his chariot to *Tripuras* (three cities of demons), took out his arrows and destroyed the cities with ease.

उदाहरणानि (EXAMPLES)

प्राप्तः अग्निः यम् सः - प्राप्ताग्निः - The thing ***which*** fire neared

ऊढो रथो यैस्ते — ऊढरथः – Those *by* which a chariot was drawn.

दत्तः पशुः यस्मै सः — दत्तपशुः – The one *to* whom a beast was given.

उद्धृताः शराः यस्मात् सः — उद्धृतशरः The thing *from* which arrows were taken out.

महद् बलं यस्य.सः — महाबलः – The one *whose* is the greatest strength.

वीराः पुरुषाः यासु ताः — वीरपुरुषाः– The cities *in* which exist valiant men.

बहुपदबहुव्रीहिसमासः
(BAHUPADA-BAHUVREEHI SAMAASA)

श्लो॥ नीलोज्ज्वलवपुः पातु श्रीमत्पीताम्बरो हरिः ।
यस्य प्रसादात्कुब्जाभूद्दिव्यसुन्दरविग्रहा ॥ 27

<u>*टीका*</u> - हरिः - Lord Sri Krishna नीलोज्ज्वलवपुः - having dark and resplendent body श्रीमत् पीताम्बरः - dressed in rich and yellow clothes पातु - may save (us) प्रसादात् - by the grace यस्य - of whom कुब्जा - a hunchback अभूत् - became दिव्यसुन्दर-विग्रहा - a woman of divine and beautiful appearance.

<u>SUMMARY</u> : May Lord Sri Krishna of dark and effulgent body, clad in rich silk save us. Even an ugly hunchback woman turned a divine beauty by His grace.

उदाहरणानि (EXAMPLES)

नीलम् उज्ज्वलं च वपुः यस्य सः - नीलोज्ज्वलवपुः
The one *having* dark and beautiful body.

श्रीमत् पीतं च अम्बरं यस्य सः - श्रीमत्पीताम्बरः
The one having a rich and yellow clothing.

दिव्यः सुन्दरश्च विग्रहः यस्याः सा - दिव्यसुन्दरविग्रहा
The woman having a divine and beautiful appearance.

सङ्ख्योभयपदबहुव्रीहिसमासः
(SANKHYOBHAYA-PADA-BAHUVREEHI SAMAASA)

श्लो॥ काननेऽस्मिन्नहो राजन् द्वित्रैरायासिता जनैः ।
लभ्यन्ते पञ्चषा नागा इत्यूचुर्बलिनः प्रभुम् ॥
28

<u>*टीका*</u> - बलिनः - Stalwarts ऊचुः - told प्रभुम् - the king इति - like this अहो राजन् - O King ! पञ्चषाः - five or six नागाः - elephants लभ्यन्ते - are found अस्मिन् - in this कानने - forest आयासिताः - being troubled द्वित्रैः - by two or three जनैः - people.

<u>SUMMARY</u> : Stalwarts told the king, "Your Majesty! Five or six elephants can be captured in this forest, that too after having a tough time in the hands of 2 or 3 elephant-trappers.

उदाहरणानि (EXAMPLES)

द्वौ वा त्रयो वा	- द्वित्राः	- Two or three
त्रयो वा चत्वारो वा	- त्रिचतुराः	- Three or four
पञ्च वा षड् वा	- पञ्चषाः	- Five or six

सङ्ख्योत्तरपदबहुव्रीहिसमासः

(SANKHYOTTARA-PADA-BAHUVREEHI SAMAASA)

श्लो ॥ ब्रह्माणः कति वा रुद्रा वदन्तमिति सङ्ख्यया ।
कुशलस्त्वेकया युक्त्या वदेदुपदशा इति ॥ 29

<u>*टीका*</u> - एकया - With a युक्त्या - clever सङ्ख्यया - number कुशलः - a wise man वदेत् - should answer इति - saying उपदशाः - nearly ten वदन्तम् - to the one who asks इति -that कति - howmany are ब्रह्माणः - Brahmas ? वा - or कति- howmany are रुद्राः - Rudras ?

<u>SUMMARY</u> : A wise man should answer " Nearly ten " in one single clever expression to the one who asks him about the number of Brahmas and Rudras (because Brahmas are nine and Rudras, eleven).

उदाहरणानि (EXAMPLES)

दशानां समीपे ये सन्ति ते - उपदशाः - Nearly ten.
Well on this, one can also model structures such as उपविंशाः उपत्रिंशाः उपशताः- उपसहस्राः - उपायुताः - उपलक्षाः etc.

सहपूर्वपदबहुव्रीहिसमासः

(SAHA-POORVAPADA-BAHUVREEHI SAMAASA)

श्लो ॥ सकळास्सहसन्तानास्सकला अपि बाडबाः ।
प्रोचुः स्वस्ति महीपाय सहपुत्राय सन्ततम् ॥ 30

<u>*टीका*</u> - सकलाः - All बाडबाः - the Brahmins सकळाः - who were skilful in arts अपि - and सहसन्तानाः - accompanied by children सन्ततम् - always प्रोचुः - said स्वस्ति - *Swasti* महीपाय - to the king सहपुत्राय - accompanied by sons.

<u>SUMMARY</u> : All the educated Brahmins, along with their sons, always used to bless the king who was accompanied by his sons.

उदाहरणानि (EXAMPLES)

कळाभिः सह वर्तन्त इति - सकळाः	- Those with arts
सन्तानैः सह वर्तन्त इति - सहसन्तानाः	- Those with children
पुत्रेण सह वर्तत इति - सहपुत्रः	- The one with a son.

दिगन्तराळलक्षणबहुव्रीहिसमासः

(DIGANTARAALA - LAKSHANA BAHUVREEHI SAMAASA)

श्लो ॥ विद्युदुत्तरपूर्वायाममोघो मारुतोऽथ वा ।
यदि दक्षिणपूर्वायां वृष्टिर्नैव भवेत्तदा ॥ 31

टीका – यदि – If विद्युत् – lightning is उत्तरपूर्वायाम् – in the Northeast अथवा – or अमोघ: – strong मारुत: – wind is दक्षिणपूर्वायाम् – in the Southeast तदा – then वृष्टि: – rain न भवेत् – will not occur एव –at all.

SUMMARY : It would not rain at all if there is lightning in the Northeast or a strong wind in the Southeast.

उदाहरणानि (EXAMPLES)

उत्तरस्याश्च पूर्वस्याश्च दिशो: यद् अन्तराळं सा – उत्तरपूर्वा
The corner between the North and the East.

दक्षिणस्याश्च पूर्वस्याश्च दिशो: यद् अन्तराळं सा – दक्षिणपूर्वा
The corner between the South and the East.

व्यतिहारलक्षणबहुव्रीहिसमास:
(VYATIHAARA - LAKSHANA BAHUVREEHI SAMAASA)

श्लो ॥ बाहूबाहवि केषाञ्चिन्मुष्टीमुष्ट्यद्भुतं तथा ।
केशाकेश्यभवद्युद्धं वानराणां च रक्षसाम् ॥ 32

टीका – अद्भुतम् – A marvellous युद्धम् – fighting अभवत् – happened केषाञ्चित् – between some वानराणाम् च रक्षसाम् – of the monkeys and demons बाहूबाहवि – with one another's arms तथा – Similarly मुष्टीमुष्टि – with one another's fists केषाञ्चित् – among some तथा–Similarly केशाकेशि–with one another's hair केषाञ्चित् – among some

SUMMARY : A fantastic battle was fought between apes and demons, with some of them wrestling, some others boxing and some gripping the enemies' hair.

उदाहरणानि (EXAMPLES)

बाहुभिर्बाहुभिश्च गृहीत्वा इदं युद्धम् प्रवृत्तम् – बाहूबाहवि
A battle fought, grappling with each other's arms.

मुष्टिभिर्मुष्टिभिश्च प्रहृत्य इदं युद्धम् प्रवृत्तम् – मुष्टीमुष्टि
A battle fought, punching each other with fists.

केशेषु केशेषु च गृहीत्वा इदं युद्धम् प्रवृत्तम् – केशाकेशि
A battle fought, gripping each other's hair.

अथ अव्ययीभावसमासनिरूपणम्
(DESCRIPTION OF *AVYAYEE - BHAAVA SAMAASA*)

श्लो ॥ यस्याऽभवत्पूर्वपदेऽव्ययस्य
नाम्नो विधानाद् द्विविधं च लक्ष्म ।
पूर्व: पदार्थोऽपि च यत्र मुख्य
स्तमव्ययीभावमुदाहराम: ॥ 33

टीका – उदाहराम: – We mention तम् – that *Samaasa* अव्ययीभावम् – as *Avyayee-bhaava Samaasa* यस्य – for which लक्ष्म – the principle is द्विविधम् – twofold विधानात् – by way of the placement अव्ययस्य – of the adverb च – and नाम्न: – the noun

even पूर्व:पदार्थ:- the meaning of the first component is मुख्य: - important.

SUMMARY : *Avyayee-bhaava Samaasa* is of two types, one of which has an adverb as first component and is known as *Avyaya-poorva-pada-avyayee-bhaava-samaasa.* The second has a noun as the first component and is known as *Naama-poorva-pada-avyayee-bhaava-samaasa.* The first component is as vital as the second to determine the meaning in both the types.

अव्ययपूर्वपदाव्ययीभावसमासः
(AVYAYA-POORVAPADA-AVYAYEE-BHAAVA SAMAASAA)

श्लो ॥ भो राजन् प्रत्यहम् भूयाद्यथाशक्त्यधिबाडबम् ।
भक्तिस्तयास्तु सम्भद्रं निष्पापमुपलोचनम् ॥ 34

टीका - भो: राजन् - O King ! प्रत्यहम् - Every day भक्ति: - devotion or piety भूयात् - should be यथाशक्ति - to one's best अधिबाडबम् - towards Brahmins तया - Because of that सम्भद्रम् - plenty of favourable things च - and निष्पापम् - dis-appearance of sin अस्तु - may happen उपलोचनम् - in sight.

SUMMARY : Your Majesty ! Plenty of favourable things happen and sins disappear, even as one looks on, if one shows devotion to Brahmins to the best of one's ability every day.

उदाहरणानि (EXAMPLES)

अहन्यहनि	- प्रत्यहम्	- Every day
शक्तिमनतिक्रम्य	- यथाशक्ति	- Not exceeding one's capacity
बाडबेषु अधिकृत्य	- अधिबाडबम्	- Towards Brahmins
भद्राणां समृद्धिः	- सम्भद्रम्	- Abundance of favourable things
पापनामभाव:	- निष्पापम्	- Absence of sins
लोचनयोस्समीपे	- उपलोचनम्	- Near one's eyes.

नामपूर्वपदाव्ययीभावसमासः
(NAAMA-POORVAPADA-AVYAYEE-BHAAVA SAMAASAA)

श्लो ॥ स्वस्यापि भोजने यस्य सूपप्रति न युज्यते ।
शाकप्रति वान्येभ्यःकथं दास्यति स प्रभुः ॥ 35

टीका - कथम् - How स: - that प्रभु: - king अपि - even स्वस्य भोजने - in the own meal यस्य - of whom सूपप्रति - a little grams वा - or शाकप्रति - a little curry न युज्यते - is not mixed दास्यति - will give अन्येभ्य: - to others ?

SUMMARY : What can a king donate to others if he himself eats a meal devoid of a little grams or curry ?

उदाहरणानि (EXAMPLES)

सूपस्य लेश:	- सूपप्रति	- A little of grams

शाकस्य लेशः - शाकप्रति - A little of curry

अथ द्वन्द्वसमासनिरूपणम्
(DESCRIPTION OF *DWANDWA SAMAASA*)

श्लो ॥ अस्मिन् समासे प्राधान्यमुभयोः स्यात्पदार्थयोः ।
सहि द्वन्द्वश्चतुर्था स्याद्बुधैरिति विनिश्चितः
36

<u>टीका</u> - प्राधान्यम् - Importance स्यात् - shall be उभयोः पदार्थयोः - to the meaning of both components अस्मिन्-in this *(Dwandwa)* समासे - *Samaasa* विनिश्चितः - It was decided बुधैः - by scholars इति - that सः - such द्वन्द्वः- *Dwandwa Samaasa* स्यात् - shall be चतुर्था - fourfold हि - indeed.

<u>SUMMARY</u> : Both the compounding words have equal importance in *Dwandwa Samaasa*. According to scholars, it has four variants.

श्लो ॥ इतरेतरयोगाख्यस्समाहाराह्वयस्तथा ।
द्वाभ्याम् पदाभ्याम् बहुभिरुभौ चेति चतुर्विधः ॥
37

<u>टीका</u> - इतरेतरयोगाख्यः - The compound named *Itaretara-yoga-dwandwa* तथा - similarly समाहाराह्वयः - the compound named *Samaahaara -dwandwa* च - and उभौ - both are चतुर्विधः - fourfold द्वाभ्याम् - with two पदाभ्याम् - words च - and बहुभिः - with many पदाभ्याम् - words इति - like this.

<u>SUMMARY</u> : *Dwandwa Samaasa* has a couple of principal variants, of each of which is again twofold, being formed with a combination of two components or that of many compo. nents, thus bringing the total number of variants to four.

They are known by the following names in Sanskrit.
1) द्विपदेतरेतरयोगद्वन्द्वसमासः 2) बहुपदेतरेतरयोगद्वन्द्वसमासः
3) द्विपदसमाहारद्वन्द्वसमासः 4) बहुपदसमाहारद्वन्द्वसमासः

द्विपदेतरेतरयोगद्वन्द्वसमासः
(DWIPADETARETARA-YOGA-DWANDWA SAMAASA)

श्लो ॥ ययोर्बलेन नमितौ निहतौ कंसरावणौ ।
सूर्याचन्द्रमसोर्वंश्यौ रामकृष्णावहम् भजे ॥ 38

<u>टीका</u> - अहम् - I भजे - worship रामकृष्णौ - Sri Raama and Sri Krishna वंश्यौ - who were the descendants सूर्याचन्द्रमसोः- of the Sun-god and the Moon-god बलेन - with the strength ययोः - of whom कंसरावणौ - Raavana and Kamsa नमितौ - were subdued च - and निहतौ - killed.

<u>SUMMARY</u> : I worship Lord Sri Raama and Lord Sri Krishna who were born in the lineage of the Sun and Moon respectively and whose might killed the demons, Raavana and Kamsa.

Explanation : चार्थे द्वन्द्वः *- When two nouns governed by the same verb in a sentence are joined as a single word, they are joined in the sense of "and" This variant of* Dwandwa *seeks to combine two gods, persons, animals, or objects belonging to different genders, numbers and times. But they must be*

governed by the same verb in the sentence.

उदाहरणानि (EXAMPLES)

कंसश्च रावणश्च	- कंसरावणौ	-Raavana and Kamsa
सूर्यश्च चन्द्रमाश्च	- सूर्याचन्द्रमसौ	-The Sun and Moon
रामश्च कृष्णश्च	- रामकृष्णौ	-Sri Raama and Sri Krishna.

बहुपदेतरेतरयोगद्वन्द्वसमासः
(BAHUPADETARETARA-YOGA-DWANDWA SAMAASA)

श्लो ॥ वापीकूपतटाकानाम् महतां स्थापनादपि ।
धर्मार्थकाममोक्षाख्यास्सिद्ध्यन्ते नात्र संशयः ॥ 39

टीका - धर्म - Virtuosity अर्थ - worldly success काम - fulfilment of desires अपि - and also मोक्षाख्याः - salvation सिद्ध्यन्ते - are achieved स्थापनात् - through the establishment महताम् - of great वापीकूपतटाकानाम् - resevoirs, wells and tanks न - No संशयः - doubt अत्र - here.

<u>SUMMARY</u> : Man can achieve the four goals of human life, namely, virtuosity, worldly success, fulfilment of desires and salvation by way of constructing large reservoirs, wells and tanks for public utility. There is no doubt in it.

उदाहरणानि (EXAMPLES)

वापी च कूपश्च तटाकश्च - वापीकूपतटाकाः

Reservoirs, wells and tanks.

धर्मश्च अर्थश्च कामश्च मोक्षश्च - धर्मार्थकाममोक्षाः
Virtuosity, worldly success, fulfilment of desires and salvation.

घटश्च पटश्च कुड्यं च - घटपटकुड्यानि
A pot, a cloth and a wall.

<u>Note</u> : The number of द्विपदेतरेतरयोगद्वन्द्वसमासः depends on the number of the individual components. Similarly, the gender of बहुपदेतरेतरयोगद्वन्द्वसमासः depends on that of the last component.

द्विपदसमाहारद्वन्द्वसमासः
(DWIPADA-SAMAAHAARA DWANDWA SAMAASA)

श्लो ॥ शीतोष्णं सुखदुःखं वा सहन् यो वर्तते सदा ।
नियम्य वाक्त्वचं सम्यक्सहि योगीति कथ्यते ॥ 40

टीका - हि - In deed सः - he कथ्यते - is described इति - as योगी - the *Yogin* यः - who सदा - always वर्तते - conducts himself सहन् - enduring शीतोष्णम् -the dualities of cold and heat वा - or सुखदुःखम् - the dualities of pleasure and pain नियम्य - after controlling वाक् त्वचम् - speech and skin सम्यक् - well.

<u>SUMMARY</u> : The man who always endures the dualities of both heat and cold or pleasure and pain and exercises restaint over his speech and skin is called the real *Yogin* (ascetic).

उदाहरणानि (EXAMPLES)

शीतं च उष्णं च तयोः समाहारः - शीतोष्णम्
A conjunction of heat and cold.

सुखं च दुःखं च तयोः समाहारः - सुखदुःखम्
A conjunction of pleasure and pain.

वाक् च त्वक् च तयोः समाहारः - वाक्त्वचम्
A conjunction of speech and skin.

बहुपदसमाहारद्वन्द्वसमासः
(BAHUPADA-SAMAAHAARA DWANDWA SAMAASA)

श्लो ॥ ढक्कामृदङ्गपटहं यस्य दध्वान मन्दिरे ।
अश्वहस्तिरथं यस्य भाविकं तस्य भूभृतः ॥ 41

टीका - भाविकम् - Welfare तस्य - to that भूभृतः - king मन्दिरे - in the house यस्य - of whom ढक्कामृदङ्गपटहम्- a collection of various drums दध्वान - sounded च - and यस्य- to whom अश्वहस्तिरथम् - horses, elephants and chariots are.

SUMMARY : May welfare be unto the king who has a number of horses, elephants and chariots and in whose palace various drums always sound.

उदाहरणानि (EXAMPLES)

ढक्का च मृदङ्गश्च पटहश्च तेषां समाहारः - ढक्कामृदङ्गपटहम्

A collection of various drums.

अश्वाश्च हस्तिनश्च रथाश्च तेषां समाहारः - अश्वहस्तिरथम्
A collection of horses, elephants and chariots.

पाणिश्च पादश्च ग्रीवा च तेषां समाहारः - पाणिपादग्रीवम्
The total of hands, legs and throat.

अथ अलुक्समासः
(ALUK SAMAASA)

श्लो ॥ कण्ठेकालं स्मरन्नेव जनुषान्धो हृदि स्पृशन् ।
वाचोयुक्तिं वदन् जीवत्यन्तिकादागतम् प्रति ॥ 42

टीका - जनुषान्धः - A man born blind जीवति - lives स्मरन् - meditating on कण्ठेकालम् - Lord Siva who has black on his neck च - and वदन् - speaking हृदिस्पृशम् - heart-rending वाचोयुक्तिम् - eloquent speech अन्तिकादागतम् प्रति- to the one who came near.

SUMMARY : A man born blind chants Lord Siva's name and fervently begs the passers-by in heart-rending words.

उदाहरणानि (EXAMPLES)

कण्ठे कालो यस्य सः - कण्ठेकालः The one having black on His neck.
जमुषा अन्धः - जनुषान्धः Blind by birth

हृदि स्पृशतीति - हृदिस्पृक् - Touching on the heart
वाच: युक्ति: - वाचोयुक्ति: - Accumulating words
अन्तिकात आगत: - अन्तिकादागत: - The one who came near
पश्यतो हरतीति - पश्यतोहर: - The one who steals some thing in full view of another.
वने चरतीति - वनेचर: - The one roaming woods.

NOTE : *Aluk Samaasa* retains the suffixes attached to the first component as they are.

गतिसमास:
(GATI SAMAASA)

श्लो ॥ साक्षात्कृत्य हरिं सम्यगलंकृत्य पुरम् प्रभो ।
तिरस्कृत्य रिपून् पाहि पुरस्कृत्य द्विजान् भुवम्
43

टीका - प्रभो - O King ! पाहि - Protect भुवम्- the land साक्षात् कृत्य- after seeing face to face हरिम्- Lord Sri Maha Vishnu च - and तिर: कृत्य - after driving away रिपून् - the enemies च - and अलंकृत्य - after decorating पुरम् - the city सम्यक्- well च- and पुर:कृत्य- after honouring द्विजान्- Brahmins.

SUMMARY : Your Majesty ! Worship Lord Sri Maha Vishnu and see Him face to face, repulse the enemies, beautify the capital city, honour Brahmins and rule over the kingdom.

उदाहरणानि (EXAMPLES)

साक्षात् कृत्वा - साक्षात्कृत्य - After seeing face to face
अलं कृत्वा - अलंकृत्य - After making some thing nice
तिर: कृत्वा - तिरस्कृत्य - After driving back
पुर: कृत्वा - पुरस्कृत्य - After putting in the front
ऊरी कृत्वा - ऊरीकृत्य - After saying OK.

नित्यसमास:
(NITYA SAMAASA)

श्लो ॥ कुम्भकारस्तन्तुवायो लोहकारक एव च ।
श्रेणयोन्येपि संस्थाप्या:पाश्र्वे ग्रामस्य यत्नत: ॥
44

टीका - कुम्भकार: - A potter तन्तुवाय: - a weaver लोहकारक: - a blacksmoth च - and अपि - also अन्ये - other श्रेणय: - trades are संस्थाप्या: - to be established एव - only पाश्र्वे- by the side ग्रामस्य - of the village यत्नत: - with an effort.

SUMMARY : Professionals in different trades like potters, weavers and blacksmiths should effortfully be settled by the side of the village itself.

उदाहरणानि (EXAMPLES)

कुम्भं करोतीति - कुम्भकार: - The one who makes pots
तन्तुं वयतीति - तन्तुवाय: - The one who weaves threads
लोहं करोतीति - लोहकार: - The one who works on iron

असमर्थसमासः
(ASAMARTHA SAMAASA)

श्लो ॥ शालातुरीयेण महात्मना हि
सर्वे समर्था विहितास्समासाः ।
तेषूपयुक्ता विहितास्तथाऽस
मर्थं तथा ज्ञापकसिद्धमुच्मः ॥ 45

<u>टीका</u> - हि - In deed सर्वे - all समर्थाः - consistent समासाः - *Samaasas* विहिताः - were formulated महात्मना- by the great soul शालातुरीयेण - PaaNini तथा - In that manner उपयुक्ताः - the useful तेषु - among them विहिताः - were formulated तथा - Similarly उच्मः - we speak of असमर्थम् - the inconsistent *Samaasa* ज्ञापकसिद्धम् - as accessible to memory.

<u>SUMMARY:</u> The formulae of all logically consistent compounds *(Samartha Samaasas)* were in deed laid down by the great ancient grammarian Paanini. The most useful of them were sofar explained in this. There is also another category called *Asamartha Samaasas* (logically inconsistent compounds). Now, I am going to describe them to the best of my memory.

श्लो ॥ तनुमुद्धूळयन् मर्त्यश्शिवभागवतो यदि ।
अरिषड्वर्गतस्तस्य भयं नास्ति कदाचन ॥ 46

<u>टीका</u> - यदि - If मर्त्यः - man is शिवभागवतः - Lord Siva's devotee उद्धूळयन् - who smears ash तनुम् - on his body नास्ति कदाचन - there is never भयम् - fear तस्य - for him अरिषड्वर्गतः - from the six internal enemies.

<u>SUMMARY:</u> If man becomes Lord Siva's devotee and smears ash all over his body, he has no fear of the six internal enemies (lust, anger, infatuation, arrogance, greed and envy). He soars above them.

उदाहरणानि (EXAMPLES)

भगवति भक्तः	-	भागवतः	- A devotee
शिवे भागवतः	-	शिवभागवतः	- Siva's devotee
षण्णां वर्गः	-	षड्वर्गः	- A band of six
अरीणां षड्वर्गः	-	अरिषड्वर्गः	- A band of six enemies.
सूर्यं न पश्यन्तीति	-	असूर्यम्पश्याः	- The women who don't face sunshine

श्लो ॥ प्रायिकमेषां कथितम् प्राधान्यं चातिमालादौ ।
दन्तोष्ठे द्वित्रादौ नैतत्सूपप्रत्यादौ ॥ 47

<u>टीका</u> - प्राधान्यम् - Importance एषाम् - of these compounds कथितम् - was described प्रायिकम्- to be common अतिमालादौ -in compounds like *Atimaalah* दन्तोष्ठे- *Dantoshtam* च- and द्वित्रादौ- in compounds like *Dwitraani* एतत् - This is न -

not सूपप्रत्यादौ - in the compounds like *Soopaprati.*

SUMMARY: The same components which assume importance in deciding the meaning of the *Samaasa* in the compounds like *Atimaalah, Dantoshtam, Dwitraani* do in these *Asamartha Samaasas* too. This is unlike the important components in the *Samaasas* like *Soopaprati.*

अथ वृत्तयः
(DERIVATIVES)

श्लो ॥ कृत्तद्धितसनाद्यन्तधातुभ्यश्चैकशेषतः ।
समासादपि विद्वद्भि : कथिताः पञ्चवृत्तयः ॥
48

टीका - पञ्चवृत्तयः - Seven types of derivatives कथिताः - were described by विद्वद्भिः - scholars कृत् तद्धित सनाद्यन्त धातुभ्यः - by the names of *Krut, Taddhita, Sanaadyanta* च - and एकशेषतः - *Ekasesha* अपि - and also समासात् - *Samaasa.*

SUMMARY: Sanskrit scholars defined seven types of derivatives (*Vruttis*), namely *Krut, Taddhita,Sanaadyanta, Ekasesha* and *Samaasa.*

कृद्वृत्तिः
(THE KRUT DERIVATIVES)

श्लो ॥ भक्तानामपि मर्त्यानाममराणामथापि वा। 49
सम्पादयति या ज्ञानं तां वाचं प्रणमाम्यहम् ॥

टीका - अहम् - I प्रणमामि - bow down ताम् - to that वाचम् - Saraswati या - who सम्पादयति - grants ज्ञानम् - knowledge भक्तानाम् - to devotees अपि - and मर्त्यानाम् - to human beings अथवा - or अमराणाम् - gods.

SUMMARY: I bow down to Saraswati, the Goddess of knowledge, Who confers it upon all gods and hu mans as well as Her devotees.

उदाहरणानि (EXAMPLES)

भजन्त इति भक्ताः	-Those who worship God
म्रियन्त इति मर्त्याः	-Those who die
न म्रियन्त इति अमराः	-Those who do not die
ज्ञायते अनेनेति ज्ञानम्	-That by which it canbe known
उच्यत इति वाक्	-That which is pronounced.

तद्धितवृत्तिः
(THE TADDHITA DERIVATIVES)

श्लो ॥ मानुषानादितेयान् वा पीडयन्तो भुवि स्थिताः ।
ये दैतेयांस्तान्निहन्तुं जातो दाशरथिः स्वयम् ॥
50

टीका - दाशरथिः - Dasaratha's son स्वयम् - Himself जातः - was born निहन्तुम् - to kill तान् - those दैतेयान् - demons ये - who स्थिताः - remained भुवि - on the Earth पीडयन्तः - harassing मानुषान् - human beings वा - or आदितेयान् -gods.

SUMMARY: Lord Sri Maha Vishnu Himself was incarnated as King Dasaratha's son to exterminate the demons who were tormenting both humans and gods.

उदाहरणानि (EXAMPLES)

मनोरपत्यानि पुमांसः- मानुषाः -Manu's male children
अदितेरपत्यानि पुमांसः- आदितेयाः-Aditi's male progeny
दितेरपत्यानि पुमांसः- दैतेयाः -Diti's male offsprings
दशरथस्य अपत्यम् पुमान्-दाशरथिः-Dasarath's male child
पुलस्त्यस्य गोत्रापत्यम् पुमान्-पौलस्त्यः
Pulastya's descendant

सनाद्यन्तधातुवृत्तिः
(THE SANAADYANTA ROOT-DERIVATIVES)

श्लो ।। यःपास्पर्धीति वा लोकान् देवैर्वैरायते सदा ।
राक्षसस्य विनाशाय तस्य पुत्रीयतु प्रभुः ।।
51

टीका - प्रभुः - His Majesty पुत्रीयतु - may desire a son विनाशाय - for the extermination तस्य - of that राक्षसस्य - demon यः - who पास्पर्धीति - challenges लोकान् - people वा-or सदा - always वैरायते - conflicts देवैः - with gods.

SUMMARY: His Majesty can aspire for a son in order to eliminate the demon who is in constant conflict with gods and challenges people.

उदाहरणानि (EXAMPLES)

अतिशयेन स्पर्धते - पास्पर्धीति -Contends in excess
वैरमाचरति - वैरायते -Maintains enmity
पुत्रमात्मन इच्छतु - पुत्रीयतु -May he want a son

एकशेषवृत्तिः
(THE EKASESHA DERIVATIVES)

श्लो ।। सर्वेषामपि लोकानाम् पितरौ यौसनातनौ ।
विदितौ पालनाच्चित्ते तौ शिवौ सततं भजे
52

टीका - सततम् - Always भजे - I worship चित्ते - in my mind तौ - that शिवौ - couple of Siva and Paarvati सनातनौ - the eternal पितरौ- parents सर्वेषाम् अपि- of all लोकानाम्- worlds यौ - who विदितौ - are well-known पालनात् - by their protection.

SUMMARY: I always worship in my mind the Primevel Couple and the Eternal Universal Parents, Lord Siva and Paarvati who are known for their protection of the world.

उदाहरणानि (EXAMPLES)

माता च पिता च - पितरौ - Both parents
सनातनी च सनातनश्च - सनातनौ - Two eternal beings
विदिता च विदितश्च - विदितौ - Two famous ones
सा च स च - तौ - They (them) both
शिवा च शिवश्च - शिवौ - The two Sivas

समासवृत्तिः
(THE COMPOUND DERIVATIVES)

श्लो ॥ समासवृत्तिस्सर्वेषु समासेन निरूपिता ।
पदार्थस्याभिधानं हि वृत्तिरित्यभिधीयते ॥

53

<u>*टीका*</u> - सर्वेषु - Among all समासवृत्तिः - the compound type of derivatives निरूपिता - was demonstrated समासेन - with compounds अभिधानम् - The name पदार्थस्य - of the meaning हि - itself अभिधीयते - is called इति - as वृत्तिः - *Vrutti.*

<u>SUMMARY</u>: Of all these *Vruttis*, *Samaasa Vrutti* was demonstrated herein with examples. The very type to which the meaning of a derivative belongs is known as *Vrutti.*

उपसंहारः
(THE FINIS)

श्लो ॥ भो भो मात्सर्यमुत्सार्य वात्सल्यान्मत्कृतामिमाम् ।
पश्यन्तु विबुधास्सर्वे समासकुसुमावळिम् ॥

54

<u>*टीका*</u> - भो भो सर्वे - O All विबुधाः - scholars ! भवन्तः - You पश्यन्तु - may see वात्सल्यात् - with affection इमाम् - this समासकुसुमावळिम् - book called *Samaasa Kusumaavali* मत् कृताम् - which was made by me उत्सार्य - having given up मात्सर्यम् - envy.

<u>SUMMARY</u>: O Scholars ! Kindly abandon your envy and affectionately have a glance at my work, *Samaasa Kusumaavali. (Because बोद्धारो मत्सरग्रस्ता :)*

श्लो ॥ श्रीमध्यमन्दिरकुलाम्बुधिपूर्णचन्द्र
श्रीसर्वमङ्गळमनीषिकृता सलीलम् ।
एषा समासकुसुमावळिराब्जतारं
जीयात् कृपानिधिसदाशिवसम्प्रसादात् ॥

55

<u>*टीका*</u> - श्रीमध्यमन्दिरकुलाम्बुधिपूर्णचन्द्रश्रीसर्वमङ्गळमनीषिकृता - Being done by a scholar called Sri Sarvamangala who is like the full Moon that arose out of an ocean called the Nadiminti family सलीलम् - with ease एषा - this book समासकुसुमावळिः - *Samaasa Kusumaavali* (**meaning-** A garland of the flowers of *Samaasas*) जीयात् - should succeed आब्जतारम् - as long as the Moon and stars exist कृपानिधिसदाशिवसम्प्रसादात् - by the grace of Lord Siva who is the treasure of mercy.

<u>SUMMARY</u>: May this book, titled *Samaasa Kusumaavali* written by Sri Sarvamangala Pandita, last for ever by the grace of Lord Siva.

अकारादिश्लोकानुक्रमणिका